## विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये। (९२/४१८)

विष्वक् देव इत्येतयोः सर्वनाम्नश्च [1]टेः अद्रि इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदे। विष्वग् अञ्चति इति 'विष्वद्र्यङ' (ऋ. ७. २५. १)। [2]देवद्र्यङ। सर्वनाम्नः–'तद्र्यङ' (तै. ५. ५. १. २)। '[3]यद्र्यङ' (तै. ५. ५. १. १)। अद्रिसध्र्योरन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम् (म. भा. ३. १७२)। तत्र यणादेशे कृते 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (८. २. ४/३६५७) इत्येष स्वरो भवति। विष्वग्देवयोः इति किम्? अश्वाची। अञ्चतौ इति किम्? विष्वग्युक्। वप्रत्यये इति किम्? विष्वगञ्चनम्। वप्रत्ययग्रहणमन्यत्र धातुग्रहणे तदादिविधिप्रतिपत्त्यर्थम्। तेन अयस्कृतम्, अयस्कारः इत्यत्र अतः कृकमिकंसकुम्भपात्र (८.३.४६/१६०) इति सत्वं भवति।

[७५९] छन्दसि स्त्रियां बहुलमिति वक्तव्यम्। (म.भा. ३.१७२)

'विश्वाची च घृताची च' (ऋ. ७.४३.३, ऋ. १.१६७.३) इत्यत्र न भवति। 'कद्रीची' (ऋ. १.१६४ १७) इत्यत्र तु भवत्येव॥

## समः समि। (९३/४२१)

सम् इत्येतस्य समि इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदे। सम्यक्, सम्यञ्चौ, सम्यञ्चः॥

## तिरसस्तिर्यलोपे। (९४/४२३)

[4]तिरस् इत्येतस्य तिरि इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदेऽलोपे, यदा अस्य लोपो न भवति। तिर्यक्, तिर्यञ्चौ, तिर्यञ्चः। अलोपे इति किम्? तिरश्चा। तिरश्चे। अचः इत्यकारलोपः॥

## सहस्य सध्रिः। (९५/४२२)

सह इत्येतस्य सध्रिः इत्ययमादेशो भवति अञ्चतौ वप्रत्ययान्ते उत्तरपदे। सध्र्यङ, सध्र्यञ्चौ, सध्र्यञ्चः। सध्रीचः। सध्रीचा॥

## सध मादस्थयोश्छन्दसि। (९६/३८२०)

छन्दसि विषये माद स्थ इत्येतयोरुत्तरपदयोः सहस्य सध इत्ययमादेशो भवति। 'सधमादो द्युम्निनीरापः' (वा.सं. १०.७)। 'सधस्था' (तै. सं. ५.७.७.१)॥

---

1. टेः स्थाने ब.क.ह. 2. देवान् अञ्चति इति इत्यधिकम् ब. 3. उदाहरणमिदं नास्ति फ. 4. तिरस् –लोपः नास्ति फ.